त्रिपुरा नामाद्या शक्तिरनवच्छिन्ना परा भट्टारिका शिवादिक्षित्यन्त- षट्त्रिंशत्तत्त्वमयसर्वप्रपञ्चात्मिका तदुत्तीर्णा चेति सर्वोपनिषत्प्रसिद्धम् ।

End:

अयमर्थः—विभ्राजमानाम्, अनन्तकोटिसंख्या(क)किरणैरिति शेषः, प्रकाशमानाम्। हरिणीं हरितवर्णाम्, हरिणीमिति श्रुतेः। यशसा कीर्त्या।

(*b*) त्रिपुरोपनिषद्भाष्यम्.

TRIPURŌPANIṢADBHĀṢYAM.

Foll 77*a*—190*a* Fol. 190*b* is left blank.

This is a commentary on the work described under No. 525 of the D.C.S. MSS., Vol. I, Part III. The author of the commentary is Rāmānanda, a disciple of Rāghavānandatīrtha. Two works known as Subhagōdaya and Saubhāgyavidyā are ascribed here by this author to Śaṅkarācārya.

Complete.

Beginning:

शोणप्रभं सोमकलावतंसं पाणिस्फुरत्पञ्चशरेक्षुचापम्।
प्राणप्रियं नौमि पिनाकपाणेः कोणत्रयस्थं कुलदैवतं नः॥

घ्राणायुष्करबाणां रसनाजीवननिदानचापलताम्।
पाशाङ्कुशाञ्चितकरां प्राणकलां नौमि पञ्चवक्त्रस्य॥

दीव्यन्तौ तमसः पारे स्त्रीपुंसव्यक्तिविग्रहौ।
जगतः पितरावाद्यावुपासे दिव्यदम्पती॥

*　　*　　*　　*

नत्वा श्रीराघवानन्दतीर्थयोगीन्द्रपादुकाम्।
त्रिपुरोपनिषद्भाष्यं क्रियते तत्कृपाबलात्॥

श्रीशंकराचार्यकृतान् प्रबन्धान् सौभाग्यविद्यासुभगोदयादीन्।
पुनः पुनः साधु विचिन्त्य बुद्ध्या तदध्वना भाष्यमिदं करोमि॥

श्रीमन्तो हीष्टसाधने प्रवर्तन्ते, अनिष्टसाधनान्निवर्तन्ते, तदुभयभिन्नमुपेक्षन्ते। इष्टत्वादितारतम्यात् प्रवृत्त्यादेरपि तारतम्यं भवति। आत्मा चेष्टतमः। तदात्मलाभान्न परं विद्यते।

End:

एवमेतावत्पर्यन्तं प्रतिपादितं वाक्यजातं गुरूपदेशादेवावगन्तव्यमित्याह—इत्युपनिषदिति। इतिशब्द उक्तपरामर्शी। उपनिषच्छब्दो

रहस्यवाचकः । आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापयतीति श्रुतेः । अत एतत्सर्वं गुरूपदेशादेवावगन्तव्यमित्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकश्रीराघवानन्दतीर्थयोगीन्द्रचरणारविन्द-चञ्चरीकायमा(णा)नन्दहृदयश्रीरामानन्दविरचितं त्रिपुरोपनिषद्भाष्यं समाप्तम् ॥

अलिकोमलवेणी सा कलिकोदञ्चितस्तनी ।
ललितापहरेत्क्रूरकलितापपरम्पराम् ॥

The MS. was copied by Lēkiri Veṅkaṭācāriyar for Rāmasvāmi Śāstri of Tanjore, and the copying was completed on Tuesday, the 7th of Āni and the 2nd of the bright fortnight of the same month, in the year Saumya.

Fol. 191*a* contains Ṛks 1 to 6 of the 162nd Śūkta in the tenth Maṇḍala of the Ṛgvēda. Fol. 191*b* is left blank.

R. No. **612**.

Palm-leaf. $19\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 104. Lines, 8 in a page. Grantha Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Foll. 1*a*—99*a*. Fol. 99*b* is left blank.

Same work as the one described under Nos. 3211 and 3212 of the D.C.S. MSS., Vol. VI.

Complete.

(*b*) दायविभागश्लोकाः—सव्याख्याः.

DĀYAVIBHĀGAŚLŌKĀḤ WITH COMMENTARY.

Foll. 100*a*—104*a*. Fol. 104*b* is left blank.

A number of stanzas dealing with the Hindu law of inheritance.

Complete.

Beginning :

स्वेच्छातः स्वयमार्जिते तु विभजेदर्थे स्वभार्यासुता-
नात्मानं च समं क्रमागतधने पुत्रेच्छयाप्यस्पृहः ।
यद्येकस्तनयः पिता द्विगुणभाग्भार्या निरंशा तदा
प्रेतेऽस्मिन्नितरे समा द्विपितृकाः पौत्राः पितृद्वारतः ॥

स्वयमार्जितधनविषये विभागकालं तत्प्रकारं चाह—स्वेच्छात इति । पितुः स्वार्जिते धने यदा विभागेच्छा तदा कंचिदधिकभागेन कंचिन्न्यूनभागेनेत्येवं स्वेच्छाप्रकारेण विभजेत् । कान्? स्वभार्यासुतान्.

End :

क्लीबाद्या निजधर्मकर्मरहितास्तद्योषितः कन्यका
भर्तव्यास्तु निरंशका हरतु सत्पुत्रोंऽशमन्धादिजः ।
नो रक्ष्या न च भागिनोऽत्र पतिताः संन्यासिनो नैष्ठिका
भर्तव्योऽत्र कुटीचको दुहितरः पुत्राः स्त्रियः पूर्ववत् ॥

क्लीबादिविषय आह—क्लीबेति ।

* * * *

संन्यासात्पूर्वमुत्पन्नाः पुत्राः पूर्ववत् भागहारिणः दुहितरो भार्याश्च भतव्या भवन्ति ॥

Colophon :

इति दायादश्लोकाः सव्याख्याः संपूर्णाः ॥

This manuscript is said to have been copied by Nārāyaṇa, son of Anantayyaṅgār, and the copying completed on Thursday, the 15th of Tai, in the year Bhava.

R. No. 613.

Palm-leaf. 15 × 1¼ inches. Foll. 62. Lines, 6 in a page. Grantha. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

Foll. 1 and 2 are left blank.

वैद्यनाथस्थलमाहात्म्यम्.

VAIDYANĀTHASTHALAMĀHĀTMYAM.

Foll. 3*a*—62*b*.

This gives a legendary account of the holiness of the Śaiva shrine at Vaidisvarankoil in the Tanjore district.

Complete in twelve Adhyāyas: as found in the Śaiva-Purāṇa.

Beginning:

शुक्लाम्बर . . . शान्तये ॥
ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वलोकानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविग्रहम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥

* * * *

ईश्वरः—
शृणु देवि प्रवक्ष्यामि रहस्यमतिपावनम् ।
वैद्यनाथमिति ख्यातं गृध्रेशनगराभिधम् ॥

End:

इति प्रसन्नाननीरजा मुदा ते काश्यपाद्या मुनयो मुमुक्षवः ।
शम्भोश्चरित्रश्रवणोत्सुकोत्सुका गन्धाक्षताद्यैः पुनरप्यपूजयन् ॥

Colophon:

इति श्रीशैवे पुराणे कोटिरुद्रसंहितायामुत्कृष्टशिवक्षेत्रप्रकरणे श्रीवैद्यनाथस्थलमाहात्म्ये द्वादशोऽध्यायः ॥

R. No. **614.**

Palm-leaf. 18 × 1½ inches. Foll. 65. Lines, 12 in a page. Grantha. Injured.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) **अद्वैतदीपिकाविवरणम्.**

ADVAITADĪPIKĀVIVARAṆAM.

Foll. 1*a*—42*b*.

Same work as the one described under No. 4519 of the D.C.S. MSS., Vol. IX.

Contains Paricchēdas 2 and 3: wants beginning in the 2nd Paricchēda and wants end in the 3rd Paricchēda.

(*b*) तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

Foll. 43*a*—65*b*.

Same work as the one described under No. 4587 of the D.C.S. MSS., Vol. IX.

Complete.

R. No. **615**.

Palm-leaf. 18⅞ × 1⅞ inches. Foll. 108. Lines, 10 in a page. Grantha. Injured.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) आपस्तम्बश्रौतप्रयोगवृत्तिः.

ĀPASTAMBAŚRAUTAPRAYŌGAVṚTTIḤ

Foll. 1*a*—83*a*.

Similar to the work described under No. 1084 of the D.C.S. MSS., Vol. II.

Wants beginning and end.

Beginning:

स्नात्वाग्न्यन्वाधानार्थं स्थूलकाष्ठानि सादयित्वा प्रातरग्निहोत्रं हुत्वा पवन . . . . प्राणानायम्य कर्मणा समाराध्यमीश्वरं ध्यात्वा पौर्णमास्यां पूर्णमासेन यक्ष्य इत्युक्त्वा ।

End:

इन्द्रेण पीतस्येति द्वितीये, विश्वैर्देवैः पीतस्येति तृतीये, विष्णुना पीतस्येति चतुर्थे । अथैतांश्चमसानाद्भिः पूरयित्वेत्यादि ॥

Colophon :

इति श्रौतप्रयोगवृत्तिः ॥

* * * *

ततो माहेन्द्रप्रभृति उपांशु सरस्वत्यै वपया चरति वन्तृणो देव· सूक्ष्मचैः व्यतिरिक्तानामुपांशुत्वम् ॥

A former owner of the manuscript is said to be one Śivarāma Śāstri.

(*b*) अग्निप्रयोगः.

AGNIPRAYŌGAḤ.

Fol. 83*a*—106*b*. Foll. 107 and 108 are blank.

Gives the details of procedure connected with the kindling of the sacred fire for sacrificial purposes.

Incomplete.

Beginning :

अग्निप्रयोगो वक्ष्यते—

यस्य क्रतोरग्निं तस्य काल एवास्यापि कालः । कालस्तावद्वसन्ताद्यं पक्षप्रयोगः पूर्वमेवेष्टकाः कृत्वा पक्त्वा सप्तम्यां नान्दीमुखं कृत्वा रात्र्यां शान्त्युदकं प्रतिसरं च कुर्यात् ।

End :

सवनीयानां शाखाः छित्वाग्नीषोमीयस्य चाग्नीषोमीयेध्माबर्हिस्सम्भृत्य वैश्वानरमारुतानां मन्त्रवत् पक्षे तेषां नाना.

R. No. **616**.

Palm-leaf. 16 × 1⅓ inches. Foll. 37. Lines, 9 in a page. Grantha. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) सर्वसम्मताशिक्षा.
SARVASAMMATŚIKṢĀ.

Foll. 1*a*—4*a*. Foll. 4*b*—6*b* are blank.

Same work as the one described under No. 996 of the D.C.S. MSS., Vol. II.

Incomplete.

(*b*) शमानम्—सव्याख्यानम्.
ŚAMĀNAM WITH COMMENTARY.

Foll. 7*a*—13*b*.

Same work as the one described under No. 983 of the D.C.S. MSS., Vol. II.

Incomplete.

Foll. 14—37 are blank.

R. No. 617.

Palm-leaf. 15⅜ × 1⅜ inches. Foll. 45. Lines, 7 in a page. Grantha. Good.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

आपस्तम्बपरिभाषासूत्रव्याख्या.
ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Similar to the work described under No. 1075 of the D.C.S. MSS., Vol. II. The name of the commentator is not known.

Breaks off in the 4th Khaṇḍa.

Beginning:

यज्ञं व्याख्यास्यामः। व्याख्यानं नाम शब्दप्रतिपादितार्थस्य न्यायलब्धार्थस्वरूपकथनम् अस्मादयमर्थो लभ्यत इति। इह यज्ञश-ब्दन साङ्गोपाङ्गो विधीयते। स तु यज्ञः देवतोद्देशेन द्रव्यत्यागात्मकः क्रियाविशेषः। स हि निःश्रेयसाय चोदितः।

End:

प्रयोगं समाप्नुयात् परिसमापयेत्॥

Colophon:

तृतीयः खण्डः॥

स्वामिनोऽग्नेर्देवतायाश्शब्दात् कर्मणः प्रतिषेधाच्च प्रतिनिधिर्निवृत्तः।

* * * *

अर्थशब्दः प्रयोजनवाची । प्रयोजनं चाग्निसाध्यविहितकर्मानुष्ठानम् ।

R. No. **618.**

Palm-leaf. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 70. Lines, 7 in a page. Grantha. Good.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

ब्रह्मतर्कस्तवः—सव्याख्यः.

BRAHMATARKASTAVAḤ WITH COMMENTARY.

Foll. 1*a*—70*a*. Fol. 70*b* is blank.

A hymn of praise and pray eraddressed to Śiva, wherein the author gives his reasons for concluding that the Supreme Brahman is identical with Śiva.

Incomplete.

Beginning:

उच्चावचैरुपनिषद्वचनप्रकाण्डैरुन्मीलितश्रुतिगणैरुपबृंहणैश्च ।
यत्सादरं समुदितं यमिनामुपास्यं तद्ब्रह्म शङ्कर भवानिति तर्कयामः॥

प्रकाण्डैः प्रशस्तैः प्रशस्तान्युपनिषद्वचनानि कारणवाक्यानि । तानि हि ब्रह्मासाधारणलक्षणभूतकारणत्वमुखेन ब्रह्म समर्पयन्ति ।

End:

काश्यपेया हरं प्राप्ता जपन्तो ब्रह्मसंहिताम् ।
प्रधानानि च नर्माणि मृदूनि च शुभानि च ॥
स्वयं मृतानां कृष्णानां मृगाणां कुरुसत्तम ।
गृहीतानि विमुक्तानि देहेभ्यो वचनानि हि ॥

R. No. **619.**

Palm-leaf. $13\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 45. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

उद्धारकोशः.

UDDHĀRAKŌŚAḤ.

This is a treatise giving certain details of procedure in connection with the repetition of certain Mantras. The subjects treated of herein are —

(१) दशविद्यामन्त्रोद्धारगुणाख्यानम्.
(२) षड्देवीमन्त्रोद्धारकोशभेदसूचनम्.
(३) सप्तविद्यासप्तकुमारकोशाख्यानम्.
(४) नवग्रहमन्त्रोद्धारकोशाख्यानम्.
(५) वर्णकोशाख्यानम्.
(६) त्रिदेवीखेचरीकोशाख्यानम्.
(७) षोडशदेवीसप्तकुमारनवग्रहसप्तदेवीचतसृदेवीकोशोद्धारः.

Contains Kalpas 1 to 7 complete.

Beginning:

एकदा स्फाटिकोवीभ्रत्यशानौ(वींभृतीशौ)वनसमाकुले ।
संस्थितौ पार्वतीशम्भू लोकरक्षणतत्परौ ॥

* * * *

श्रीपार्वत्युवाच—

ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् ।
इच्छामि परया प्रीत्या वक्तुमर्हसि धूर्जटे ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि ह्युद्धारं त्रिपुरादितः ।
देवीनां दशविद्यानां मन्त्रोद्धारमनुत्तमम् ॥
ग्रन्थमुद्धारकोशाख्यं सर्वागमविनिश्चितम् ।

End:

देव्युवाच—

क्रीतास्मि भवतानेत(न) ग्रन्थेनाहं श्व(च)रेश्वर ॥
इत्युक्त्वा समहाकुब्जं कैलासाद्रेश्च जग्मतुः ॥
उभौ तावम्बिका देवी देवश्च चन्द्रशेखरः ॥

Colophon:

इति दक्षिणामूर्तिविरचिते उद्धारकोशे सकलागमसारे षोडशदेवीसप्तकुमारनवग्रहसप्तदेवीचतसृदेवीकोशोद्धारनिर्णयो नाम सप्तमः कल्पः ॥ समाप्तोऽयमुद्धारकोशः ॥

R. No. 620.

Palm-leaf. 13¾ × 1¼ inches. Foll. 63. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) रक्षाचक्रम्.

RAKṢĀCAKRAM.

Foll. 1*a*—16b. Foll. 8, 10, 12*b* and 13 are blank.

Gives details connected with the making and the sanctification of amulets.

Complete.

Beginning:

अथातस्सम्प्रवक्ष्यामि रक्षाचक्रमिमं शृणु ।
सर्वरक्षाकरं चक्रं सर्वक्षुद्रनिवारणम् ॥
सर्वरोगप्रशमनं सर्वग्रहविमोचनम् ।
सर्वपीडाहरं चक्रं सर्वदारिद्र्यनाशनम् ॥

* * * *

Colophon:

इति चिदम्बरसंमेलनादिसौम्यसंमेलनं चक्रं सम्पूर्णम् ॥

End:

आर्कार्किकोष्ठे भुवनेशि मृत्योस्तुल्यं बहिश्शैवत्रियम्बकं च ।
शूलेषु साध्यं त्वपमृत्युनाशनं त्रैलोक्यरक्षाकरयन्त्रमेतत् ॥

(*b*) **मकुटोत्तररहस्यम्.**

MAKUṬŌTTARARAHASYAM.

Foll. 20*a*—26*b*. Foll. 17 to 19 are blank.

Similar to the above.

Contains the 3rd Spanda only.

Beginning:

श्रीपार्वत्युवाच —

चिदम्बरमहानन्दनटनृत्तप्रदर्शकम् ।
रहस्याणां(नां) रहस्यं हि यन्त्रं पञ्चाक्षरस्य तु ॥
आवयोश्चक्रसंयोगं पृथक्तुं च मम प्रभो ।
नित्यं हि लोकरक्षार्थं यन्त्रं रक्षाकरं मम ॥

End:

चिदम्बररहस्यार्थमविज्ञाय कुदेशिकाः ॥
कृते त्वनर्थधा(दा)देवी कुशलेन विपाश्रिता ।
तस्मात्सर्वप्रयत्नेन ज्ञातव्यं देशिकोत्तमैः ॥

Colophon:

इति श्रीमकुटोत्तररहस्ये मन्त्रयोगोद्धारे तृतीयः स्पन्दः ॥

Foll. 27*a*—51*a* contain Yantraprayōga in Tamil. Fol. 51*b* is blank.

(*c*) **चिदम्बरप्रस्तारचक्रम्.**

CIDAMBARAPRASTĀRACAKRAM.

Foll. 52*a*—62*b*. Fol 63 contains Yantrasūtravidhi.

Similar to the above.

Complete.

Beginning:

चिदम्बरमहाचक्रं प्रस्तारं चक्रमुच्यते ।
रहस्याणां(नां) रहस्यं तत् सत्रिचक्रोत्तमोत्तमम् ॥
समस्तदेवसंसेव्यां दर्शनाद्भुक्तिमुक्तिद(ा)म् ।
एकां गोमयेन लिप्ते स्वगृहे पट्टसंवृते ॥

End:

तुशब्देन षट्सङ्ख्या, वशब्देन चतुस्सङ्ख्या, आहत्य अष्टाचत्वारिंशत्सङ्ख्याअ(का)ङ्कुलात्मकमित्यर्थः ॥

चतुश्शतपदेषु चतुश्शतपञ्चाक्षरलेखनप्रकारः ॥

* * * *

मायाबीजत्रयरूपं ह्रींकारत्रयं विलिखेत् ॥

R. No. **621**.

Palm-leaf. 10, 10¾ and 11⅞ × 1⅝ inches. Foll. 82. Lines, 8, 10 and 21 in a page. Grantha. Good.

Foll. 1 and 2 are left blank.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) **शिवज्ञानबोधोपन्यासः.**

ŚIVAJÑĀNABŌDHŌPANYĀSAḤ.

Foll. 3*a*—23*b*.

A commentary on the Śivajñānabōdha contained in the Rauravāgama described under No. 5109 of the D.C.S. MSS., Vol. X: by Nigamajñānadēśika of Puliyur, at the request of Sundaranātha.

Complete.

Beginning:

स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हत्वैतत्सृजत्वस्मात्प्रभुर्हरः ॥

स्त्रीति । स्त्रीपुंनपुंसकादीत्यत्र आदिशब्दः प्रकारवाची ; भूवादयो धातव इत्यत्र व्याकरणसूत्रे आदिशब्दस्य प्रकारवाचित्वेनापि व्याख्यानात् । प्रकारश्चात्र जगच्छब्दस्यार्थप्रपञ्चवाचित्वपक्षे संस्थानविशेषः । अवयवसन्निवेशविशेष इति यावत् । शब्दप्रपञ्चवाचित्वपक्षे तु प्रकारत्वेन स्वरूपं विवक्षितमिति ।

End:

शिवशास्त्रप्रतिपादितानां पतिपशुपाशलक्षणानां निर्णयं निर्णायं विद्यात् जानीयात् शक्तिपातपवित्रितशास्त्रसिद्धोऽधिकारी । सर्वं भद्रम् ॥

दक्षिणामूर्तिकृपया निगमज्ञानदेशिकः ।
सुन्दरोक्त्या शिवज्ञानबोधोपन्यासउ(मु)क्तवान् ॥

Colophon:

इति बालबोधसौन्दरनाथप्रार्थनया व्याघ्रपुरनिवासिना निगमज्ञान-देशिकेन विरचितशिवज्ञानबोधोपन्यासस्समाप्तः ॥

The name of the scribe is given thus :—

श्रीमद्धरदत्तदेशिकान्तेवासिपरम्परासमागतशिवरामलिङ्गशिवविलिखित-शिवज्ञानबोधः समाप्तः ॥

Foll. 24—26 are left blank.

(*b*) शिखरिणीमाला—शिवतत्त्वविवेकसहिता.

ŚIKHARIṆĪMĀLĀ WITH ŚIVATATTVAVIVĒKA.

Foll. 27—75. Foll. 76 and 81 are left blank. Fol. 82*a* contain sCātuślōka and fol. 82*b* is left blank.

Same work as the one described under No. 5106 of the D.C.S. MSS., Vol. X.

Wants beginning ; otherwise complete.

The following stanza gives the name of the scribe :—

शैवपादाब्जभृङ्गेण शिवैकशरणार्थिना ।
अलेखि श्रीनिवासेन शिवतत्त्वविवेककः ॥

R. No. **622.**

Palm-leaf. 16⅛ × 1⅓ inches. Foll. 122. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

Foll. 1 and 2 are left blank.

(*a*) शिवस्तोत्रम्.

ŚIVASTŌTRAM.

Foll. 3*a*—6*b*.

A hymn of praise and prayer addressed to Śiva by Viṣṇu. Incomplete.

Beginning:

महेशानन्ताद्यत्रिगुणरहितामेयविमल-
स्वराकारापारामितगुणगणा . . . ।
धराधारा . . . मखरनिराकारपरम-
प्रभापूराकारावरपर नमो वेद्य शिव ते ॥

End:

प्रमादाद्ये केचिद्विततमपराधाविधि . . ताः
(ग)ताः सर्वे तेऽपि प्रशममुपयान्तु स्फुटतरम् ।
शिव श्रीमञ्छम्भो शिव शिव महेशेति च जपन्
क्वचिल्लिङ्गाकारे शिव हर वसा . . . . . ॥

शैव उवाच—

इति स्तुत्वा शिवं विष्णुः प्रणम्य च मुहुर्मुहुः ।
निर्विण्णो न्यवसत्तत्र कृताञ्जलिपुटाश्चिरम् ॥

(*b*) त्रिपुरार्चनपद्धतिः.

TRIPURĀRCANAPADDHATIḤ.

Foll. 7*a*—74*a*. Fol. 74*b* is left blank.

This is a ritualistic manual for the worship of Tripurā or Dēvī in accordance with Candrajñānārṇava. The author of the work is Divākara *alias* Dakṣiṇāmūrtinātha, son of Gōpālakṛṣṇa and Lakṣmī of Bhāradvājagōtra, and a disciple of Cidambarasvāmin.

Contains Paṭalas 1 to 11.

Beginning:

खण्डनाय मदरातिसंततेर्दण्डनाय तदधीनदेहिनाम् ।
पुण्डरीकपुरताण्डवेशितुः पुण्ड . . . . मुद्यतः ॥

द्विजराजवतंसाय जातवेदस्स्फुरद्दृशे ।
नमश्चिदम्बरब्रह्मस्वामिने परमात्मने ॥
स्वयं मां कृपया या श्रीविद्यामृतमपाययत् ।
तद्रोग(शमनाय) श्रीपादुकां पूजयाम्यहम् ॥
दिवाकरेण गोपालकृष्णलक्ष्मीतनूभुवा ।
भारद्वाजेन भुवनभद्रदानचणात्मना ॥
चन्द्रज्ञानार्णवप्रोक्त(त्रि)पुराण्डानुसारतः ।
विरच्यते विधानेन त्रिपुरार्चनपद्धतिः ॥

तुरीययामे बुद्ध्या निर्वर्तितावश्यककर्तव्यो वा शयानो वा प्रे(प्रय)तासने . . . . चिर्भूत्वा ब्रह्मरन्ध्रस्थश्वेतसहस्रदलकमलकर्णिकायां सिंहासने समुपविष्टं वामाङ्कगतया देव्या रक्तवर्णया रक्तवस्त्राभरणभूषितया वामकरधृतलीलाकमलया दक्षिणभुजेनालिङ्गितम् ।

* * * *

Colophon:

दक्षिणामूर्तिनाथेन कृतायामिति संग्रहात् ।
त्रिपुरार्चनपद्धत्यां प्रथमः पटलोऽभवत् ॥

* * * *

Colophon:

दिवाकरेण गोपालकृष्णलक्ष्मीतनूभुवा ।
भारद्वाजेन भुवनभद्रदानचणात्मना ॥
दक्षिणामूर्तिनाथेन कृतायां देशिकाज्ञया ।
त्रिपुरार्चनपद्धत्यां पञ्चमः पटलोऽभवत् ॥

इति श्रीमत्परमहंस . चन्द्रज्ञानानुसारिण्यां चन्द्रकलाविद्याविवरणं नाम पञ्चमः पटलः ॥

* * * *

Colophon:

दक्षिणामूर्तिनाथेन कृतायां देव्यनुज्ञया ।
त्रिपुरार्चनपद्धत्यामष्टमः पटलोऽभवत् ॥

इति श्रीमत्परमहंस . चन्द्रज्ञानानुसारिण्यां सकलशास्त्रशिरोमणिनामपारायणविद्याविवरणं नामाष्टमः पटलः ॥

* * * *

Colophon:

दिवाकरेण . . . . ना ॥

दक्षिणा . पद्धत्यां नवमः पटलोऽभवत् ॥

इति श्रीमत्परमहंस . चन्द्रज्ञानानुसारिण्यां देशकालनिरूपणं नाम नवमः पटलः ॥

* * * *

Colophon:

दिवाकरेण . . . . त्मना ॥

द . . . . वत् ॥

इति श्रीमत् . पूजाफलनिरूपणं नाम दशमः पटलः ॥

End:

संविदा परमया हृतं स्रुचं वेद्यहव्यमखिलं जुहोम्यहम् ॥

अनन्तरं बलिं दद्यात् । ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा । इति पूर्वाचार्योक्तरीत्या परमामृतं पायंपायं सुखी विहरेत् । इति सर्वं शिवम् ॥

दिवाकरेण गोपालकृष्णलक्ष्मीतनूभुवा ।

भारद्वाजेन भुवनभद्रदानचणात्मना ॥

दक्षिणामूर्तिनाथेन कृतायां देव्यनुज्ञया ।

ललितार्चनपद्धत्यां पटलैकादशोऽभवत् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मविद्यासंप्रदायप्रवर्तकातिवर्णाश्रमिचिदम्बरस्वामिप्रियतमान्तेवसदग्रेसरभरद्वाजाभिजनरत्नाकराभिनवराकासुधाकरदिवाकरसूरिविरचितायां त्रिपुरार्चनपद्धत्यां चन्द्रज्ञानानुसारिण्यां दूतीयागविधानं नामैकादशः पटलः ॥

(c) चन्द्रज्ञानागमसंग्रहरहस्यम्.

CANDRAJÑĀNĀGAMASAṄGRAHARAHASYAM.

Foll. 75a—122b.

This treatise deals with all the details connected with the Śrīvidyāmantra intended to propitiate Dēvī. The following list gives the names of the various Paṭalas.

I. षडाम्नायलक्षणम्.
II. पीठलक्षणम्.
III. श्रीचक्रलक्षणम्.
IV. श्रीचक्रदेवतानिरूपणम्.
V. Do.
VI. श्रीविद्यासंध्यानुष्ठानम्.
VII. श्रीविद्यान्यासकलापः.
VIII. श्रीविद्याजपकलापः.
IX. पूजादेशकालनिरूपणम्.
X. चक्राराधनफलम्.
XI. शक्तिपूजाफलम्.
XII. संवित्संसेवनम्.
XIII. शाक्तसमयदीक्षाविधानम्.
XIV. दीक्षाविधानम्.
XV. मन्त्रार्थप्रतिपादनम्.

Paṭalas 8 to 11 are given along with Paṭalas 8 to 11 in Tripurārcanapaddhati.

Beginning:

अथातः संप्रवक्ष्यामि त्रिपुराण्डस्य लक्षणम् ।
यदुक्तं पूर्वमस्तीति शाक्तमण्डं हिरण्मयम् ॥
अनेककोटिब्रह्माण्डकोटीनां बहिरूर्ध्वतः ।
अस्ति बालार्ककोट्याभं त्रिपुराण्डं हिरण्मयम् ॥

* * * *

अयोमयात्तु प्राकारात् बाह्ये तु पुररक्षकाः ।
भैरवो वीरभद्रश्च कार्तवीर्यार्जुनस्तथा ॥

End:

श्रेयोऽर्थी प्रीणयेन्नित्यं कार्येन वचसा धनैः ॥
तस्मिन् प्रीते महादेवे श्रीविद्योपासके गुरौ ।
(नियतं) तस्य देवेशि सुलभाः सिद्धयोऽखिलाः ॥

तस्माद्यः प्रीणयेन्नित्यं येन केनाप्युपायतः ।
विद्यामन्त्ररहस्यज्ञं सन्तो गा . . . मुयात् ॥

Colophon:

इति श्रीमच्चन्द्रज्ञानागमसंग्रहरहस्ये मन्त्रार्थप्रतिपादनं नाम पञ्चदशः पटलः ।

Fol. 122*b* gives a dozen names of the goddess Śakti.

R. No. **623.**

Palm-leaf. 15 × 1⅜ inches. Foll. 60. Lines, 6 in a page. Grantha. Very much injured.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

खण्डनक्षेत्रमाहात्म्यम्.

KHAṆḌANAKṢĒTRAMĀHÂTMYAM.

A legendary account of the greatness of the shrine dedicated to Śiva at Tirukkandiyur near Vyāghrapurī (Puliyur) in the Tanjore district.

Contains Adhyāyas 1 to 14 complete: as found in the Skāndapurāṇa.

Beginning:

शुक्लाम्बरधरं . . . . शान्तये ॥

भगीरथः—

दिलीपस्यात्मजः पूर्वं गङ्गामानयनो(नेतुमु)द्यतः ।
विशिष्टं तपतां श्रेष्ठं पूजयित्वा स्वभक्तितः ॥
प्रणम्य परिपप्रच्छ वसिष्ठं स्वपुरोहितम् ।

* * * *

भूमौ मोक्षकरं पुण्यं पुरुषार्थविधायकम् ।
शिवक्षेत्रोत्तमं शुद्धं . . . . न संशयः ॥
आदिबिल्ववनं नाम्ना कावेर्या दक्षिणे तटे ।
दक्षिणे व्याघ्रपुर्याश्च क्रोशद्वययुते शुभे ॥

End:

खण्डनेशस्य माहात्म्यं श्रुत्वा ते मुनिपुङ्गवाः ।
पूजयामासुरत्यन्तं सूतं पौराणिकोत्तमम् ॥

Colophon:

इति स्कान्दे उपरिभागे वसिष्ठभगीरथसंवादे तीर्थगोलके खण्डन-क्षेत्रमाहात्म्ये चतुर्दशोऽध्यायः ॥

खण्डनक्षेत्रमाहात्म्यं संपूर्णम् ॥

The copying of the MS. is said to have been completed by Rāmasvāmi of Tillaisthānam on the 7th of Citrai in the year Śukla.

R. No. **624.**

Śrītāla. 12×2⅛ inches. Foll. 215. Lines, 17 in a page. Grantha. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

Fol. 1 is left blank. Fol. 2 seems to be duplicate of fol. 9.

अद्वैतदीपिकाविवरणम्.

ADVAITADĪPIKĀVIVARAṆAM.

Foll. 3*a*—211*b*.

Same work as the one described under No. 4519 of the D.C.S. MSS., Vol. IX.

Contains the first Paricchēda incomplete, the second complete, and the third incomplete.

Foll. 212—215 are left blank.

R. No. **625.**

Paper. 10⅝×4⅛ inches. Foll. 12. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1912–13 from Subrhamaṇya Śāstri of Tiruvadi.

बोधायनदर्शपूर्णमासप्रयोगः.

BÔDHÂYANADARŚAPŪRṆAMĀSAPRAYÔGAḤ.

Similar to the work described under R. No. 161 *ante*.

Wants beginning; otherwise complete.

The date of transcription and the name of the owner are thus given:—

विक्रारिसंवत्सरे आषाढबहुलचतुर्दशीसोमवासरे बोधायनसूत्रं संपूर्णम् ॥
अप्पाव्यासस्य पुस्तकम् ॥

R. No. 626.

Paper. 8⅓ × 3 inches. Foll. 32. Lines, 9 in a page. Grantha. Good.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

महाशैवतन्त्रम्.

MAHĀŚAIVATANTRAM.

From the list of the subjects treated in the 36 chapters of this work, it will be seen that it contains details connected with the worship and Mantras relating to Vināyaka, Lakṣmī, Viṣṇu, Śiva, Rati, Bhūmi, etc. The work is ascribed to Śiva.

The subjects dealt with in the various chapters are—

I. विघ्ननिवारणमन्त्रोद्धारविधिः.
II. आचारविधिः.
III. महिमविधिः.
IV. जपलक्षणविधिः.
V. यजनविधिः.
VI. होमविधिः.
VII. प्रयोगभेदविधिः.
VIII. पञ्चावरणस्तुतिः.
IX. लक्ष्मीविद्याविधिः.
X. रमाविद्याविधिः.
XI. रमेशप्रयोगविधिः.
XII. गिरिजाविधिः.
XIII. गिरिजापतिविधिः.

XIV. रतिविद्याविधिः.
XV. रतिपतिविधिः
XVI. भूविद्याविधिः.
XVII. महीपतिविधिः.
XVIII. आशुगणपतिविधिः.
XIX. ऋद्धिविद्याविधिः.
XX. आमोदगणपतिविधिः.
XXI. समृद्धिविधिः.
XXII. प्रमोदगणपतिविधिः.
XXIII. कान्तिविद्याविधिः.
XXIV. सुमुखगणपतिविधिः.
XXV. मदनावतीविद्याविधिः.
XXVI. दुर्मुखगणपतिविधिः.
XXVII. मदद्रवाविद्याविधिः.
XXVIII. अविघ्नगणपतिविधिः.
XXIX. द्राविणीविद्याविधिः.
XXX. विघ्नकर्तृगणपतिविधिः.
XXXI. वसुधाराविधिः.
XXXII. शङ्खनिधिविधिः.
XXXIII. वसुमतीविधिः.
XXXIV. पद्मनिधिविधिः.
XXXV. अष्टाङ्गशक्तिविधिः.
XXXVI. चतुरावृत्तितर्पणविधिः.

Complete.

Beginning:

गुरुं सदाशिवं शम्भुं रुद्रं विश्वंभरं विधिम् ।
परां पराशिवां मायां वन्दे रौद्रीं श्रियं गिरम् ॥
श्रीमद्ब्रह्मरसानुभूतिवरदस्त्रैलोक्यविद्यानिधि-
र्विश्वाश्चर्यानेशेषसिद्धिजनकः सर्वार्थसद्बोधकः ।
श्रीमत्पुष्करभैरवस्य च मनोः कल्पं यथाशोधितं
वक्तुं विश्वसुखावहं प्रणतवान् विघ्नेश्वरं शंकरः ॥
श्रीमच्छंकरशंकरेण जगतां स्वस्वोचितं बोधितुं
श्रीनाचिद्गगनात्मनो गणपतेर्विघ्नौघविध्वंसिनः ।
देव्याः शंकरभाषितं प्रथमतः कल्पं महाशैवके
तन्त्रेऽनन्तगुणात्मनां रचयते धर्मादिसंसिद्धये ॥

जन्मद्वादशवत्सरादविकलां विद्यामधीत्याखिलां
वाणीं नित्यसमस्तमूर्तिमुचिते स्तुत्वानुशिष्यागमान् ।
कल्पं पुष्करभैरवस्य च गणाधीशस्य लक्ष्म्याश्च वै
नो(प्रो)क्तं सूचितमौपदेशिकमहं वक्ष्ये शिवानुग्रहात् ॥

* * * *

श्रीदेव्युवाच—

देवदेव जगन्नाथ चित्सदानन्द शाश्वत ।
चिदाख्यानमिह श्रोतुं चिरादिच्छाम्यहं प्रभो ॥
चिदाख्यानविधानेषु नानावेदागमात्मसु ।
सर्वार्थसाधनोपायं तद्वदस्व दयानिधे ॥

श्रीशिव उवाच—

सर्वशास्त्रार्थसारेषु मन्त्रकोशेषु सर्वतः ।
सर्वैरुपासितव्यं यत् तद्वदामि परात्परम् ॥
सर्वदेवमयः शम्भुः शिववन्द्यो विनायकः ।
तस्माद्वैनायकं कल्पं सावधानमनाः शृणु ॥

End:

नानासिद्धिं स्वतन्त्रं बहुविधसकलं ज्ञानयोगात्मबोधं
विद्यां धान्यं धनं चाचलमनु महासौहृदं विश्ववश्यम् ।
भूष्यं भूपालकोटिप्रणतवरपदं सर्वसत्त्वं च भूमौ
दीर्घं संप्राप्य भूयो गणपतिमनुवच्छ्रीरिवाकारमेति ॥

Colophon:

इति श्रीमहागणपतिकल्पे उमामहेश्वरसंवादे शंकरेण विरचिते कलौ प्रत्यक्षसिद्धिप्रदे महाशैवतन्त्रे अतिरहस्ये चतुरावृत्तितर्पणविधिर्नाम षट्त्रिंशपीठिका ॥

R. No. 627.

Paper. $8\frac{3}{4} \times 3\frac{3}{8}$ inches. Foll. 72. Lines, 11 in a page. Grantha. Good.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

Foll. 1*a*, 7*b*, 26*b*, 43*b*, 44*a*, 58*a*, 61*a*, 62*b* and 72*a* are left blank.

गणपतिकल्पः.
GAṆAPATIKALPAḤ.

From the following list of the subjects dealt with herein, it may be seen that this work gives the necessary details connected with the worship and the Mantras relating to the various manifestations of Gaṇapati :—

Foll.		
1*b* - 7*a*	अर्कगणपतिकल्पः.	
8*a*—10*a*	बीजगणपतिविधानम्.	
10	वक्रतुण्डगणपतिकल्पः.	
10*b*	गणपतित्र्यक्षरीविधानम्.	
10*b*—11*b*	शक्तिगणपतिकल्पः	
12	कुक्षिगणपतिकल्पः.	
12*b*—13*b*	लक्ष्मीगणपतिविधानम्.	
14*a*—18*b*	महागणपतिकल्पः.	
18*b*—20*a*	म्हागणपत्यार्यास्तुतिः.	
21*a*—22*b*	गणेशोपनिषत्.	
23*a*—25*a*	गणपतिकवचम्.	
25*a*—26*b*	गणपत्यष्टोत्तरशतम्	
26*b*—27*a*	गणपत्यष्टकम्.	
27*a*—30*a*	गणेशकवचम्.	
30*a*—31*b*	गणेशाष्टकम्.	
32*a*—34*b*	मन्त्राक्षरावलीस्तोत्रम्.	
34*b*—36*b*	गणेशाष्टकम्.	
37	गणेशपञ्जरम्.	
38*a*—40*a*	महागणपतिकवचम्	
40*b*—43*a*	महागणपतिभुजङ्गः.	
44*b*—58*b*	हरिद्रागणपतिकल्पः	(a portion, Paṭalas 1—8 of Vaināyakasaṁhitā).
59*a*—62*a*	गणेशतर्पणविधिः.	(the lines are written in disorder).
63*a*—72*b*	गणपतिविधानम्.	

Complete.

Beginning:

अर्कगणपतिकल्पप्रारम्भः—

अस्य श्रीअर्कगणपतिमहामन्त्रस्य सनत्कुमार ऋषिः, निचृद्गायत्री छन्दः, सकलसुरासुरवन्दितश्रीमदर्कगणपतिर्देवता।

* * * *

ओं गणपते अर्कगणपते वर(द) वरद सर्वजनं मे वशमानय स्वाहा। अष्टाविंशतिवर्णो वश्यप्रधानोऽयं मन्त्रः।

End:

धारयेद्बाहुना यन्त्रं सर्वान् कामानवाप्नुयात्॥
शक्तचङ्कुशं ध्रुवान्ते स्यात् स्वबीजं हृदयान्ततः॥
सर्वविघ्नाधिपायान्ते एतं सर्वार्थसिद्धिदम्॥

Colophon:

इति श्रीशारदातिलके त्रयोदशपटलोक्तप्रकारेण श्रीमहागणपतिविषयः समाप्तः॥

शारदातिलकोक्तप्रकारेण श्रीमहागणपतिविषयः समाप्तः॥

R. No. **628.**

Paper. 8×4¼ inches. Foll. 34. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

बोधायनेष्टिप्रयोगः.

BŌDHĀYANĒṢṬIPRAYŌGAḤ.

Similar to the work described under R. No. 70 *ante.*

Contains the details of procedure regarding the performance of the sacrificial rites called Ādhāna, Agnihōtra and Anvārambha: according to Bōdhāyana.

Complete.

The MS. is said to have belonged to one Svāmidīkṣitar.

Beginning:

अग्नीनाधास्यमानो भवति स उपकल्पयते सिकताश्चोषाश्चारण्याखुत्करं च वल्मीकवपां च स्रुचं च।

अलाभे कुलीरसुषिरमृदमारण्यवराहविहतं च पुष्करपर्णं च शर्कराश्चेत्यष्टौ पार्थिवाः ।

End:

कूश्माण्डानि सारस्वतौ होमौ च हुत्वा पृष्ठ्यास्तरणाद्यन्वारम्भोष्टिं यजमानव्रतविसर्गवर्जमविकृतां समाप्य पौर्णमासेष्टेः पाणिसंमर्शनादि संतिष्ठत एवेष्टिः संपूर्णपात्राविष्णुक्रमा विसृजते व्रतम् ॥

Colophon:

इति बोधायनोक्ताधानाग्निहोत्रान्वारम्भेष्टिप्रयोगाः समाप्ताः ॥

R. No. 629.

Paper. $7\frac{7}{8} \times 4\frac{1}{8}$ inches. Foll. 33. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

बोधायनाधानमन्त्रानुक्रमणिका.

BŌDHĀYANĀDHĀNAMANTRĀNUKRAMAṆIKĀ.

This is an index of the Mantras to be repeated in connection with the performance of the ritual called Ādhana: according to Bōdhāyana.

Incomplete.

Beginning:

गणानां त्वा । नान्दीमुखां प्रीयन्ताम् । शान्त्युदककर्म करिष्ये । प्रतिसरबन्धकर्म करिष्ये । आपो हि ष्ठा . . भूर्भुवः सुवः । अग्न्यादयः प्रीयन्ताम् । शुक्लाम्बरधरम् । ओं भूः यज्ञाधिदैवतम् । पुरुष एवेदम् । याः पुरस्तात् । श्रद्धयेहि । आकूत्यै त्वा । अद्य श्रीभगवतः मगोपात्तसर्वकामोऽग्नीनाधास्ये सर्वक्रत्वर्थम् ।

श्रीयज्ञशर्माहं ब्रह्मत्वेन त्वा गच्छामि, याजयतु मा भवान् ।

End:

अध्वर्यो अनडुहं ते ददामि । ऋत्विजो मिथुनौ गावौ वासः पञ्च गाश्च वो ददामि । अग्नेरहमुज्जितिम् । अग्नये पवमानायेदम् । अग्नेः पवमानस्याहमुज्जितिम् । अग्नये पावका(य) ।

Fol. 33*b* is left blank.

R. No. **630.**

Paper. 12×5 inches. Foll. 40. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

तर्कवादः.

TARKAVĀDAḤ.

Foll. 1*b*—40*a*. Foll. 1*a* and 40*b* are left blank.

Same work as the one described under No. 4244 of the D.C.S MSS., Vol. VIII.

Complete.

R. No. **631.**

Paper. 12 × 5 inches. Foll. 144. Lines, 11 in a page. Telugu. Good.

Purchased in 1912–13 from Subrahmaṇya Śāstri of Tiruvadi.

Foll. 1*a*, 54*a*, 116*b*, 117*a* and 144*b* are left blank.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Same work as the one described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains केवलान्वयि, केवलव्यतिरेकि, व्याप्त्यनुगम, पूर्वपक्षव्याप्ति and सहचारवाद.

R. No. **632.**

Palm-leaf. 15½ × 1¼ inches. Foll. 50. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

(*a*) पाणिनीयवादनक्षत्रमाला.

PĀṆINĪYAVĀDANAKṢATRAMĀLĀ.

Foll. 1*a*—21*a*. Fol. 21*b* is left blank.

This contains discussions on 27 grammatical points bearing on the interpretation and application of Pāṇini's aphorisms. By Appayadīkṣita of Bhāradvājagōtra.

Contains क्वौ लुप्तवाद complete, and अन्तरङ्गपरिभाषावाद incomplete.

Beginning:

क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमिति वार्तिके क्वौ लुप्तं न स्थानिवदित्यर्थस्य क्वचित् ग्रन्थेषु निषेधदर्शनात् क्वचिदङ्गीकार[दङ्गीकार]दर्शनाच्च विप्रतिपत्त्या विचार आरभ्यते । तत्र कश्चिदाह—क्वौ विधिं प्रति न स्थानिवदित्येवाश्रीयते, न तु क्वौ लुप्तं न स्थानिवदिति ।

* * * *

युष्मदस्मदोः त्वाहाद्यादेशा इति वचनसामर्थ्यादेव स्थानिवद्भावबाधस्य प्रकल्प्यत्वात् ॥

Colophon:

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीमहाव्रतयाजिश्रीमदप्पयदीक्षित[स्य]विरचितपाणिनीयवादनक्षत्रमालां(लायां) क्वौलुप्तं न स्थानिवदित्यस्यार्थस्य निराकरणसमर्थश्रवणनक्षत्रवादः ॥

End:

बहिरङ्गासिद्धत्वेन स्थानिलक्षणकार्यं न भवतीति ज्ञापने न किंचित् प्रयोजनमस्तीति वाच्यम् । एतत्प्रयोजनोपन्यासस्य दिक्प्रदर्शनमात्रत्वात् । तथाहि—बिम्ब्याः फलं बदर्याः फलम् (इत्यत्र) बिम्बीबदरीशब्दाभ्यामनुदात्तादेरित्यञि तस्य फले लुकि लुक्तद्धितलुकि ।

R. No **633**.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 39. Lines, 7 in a page. Grantha. Good.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1 is left blank.

दयाशतकम्— सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY.

Foll. 2*a*—34*b*. Foll. 11*b* and 35—39 are left blank.

This is a hymn of 100 stanzas in praise of the Mercy of Śrīnivāsa, a form of Viṣṇu, worshipped at Tirupati. By Vēdāntadēśika. The commentary is by Rāmānuja, son of Śēṣācalārya and a resident of Tirupati.

Breaks off in the 72nd stanza.

Beginning:

वेदान्तदेशिकं वन्दे वेदा[न्ता]न्तनवशेवधिम् ।
लीलालापोऽपि यस्यासीदालोकस्तत्त्वदर्शने ॥

* * * *

शेषाचलार्यतनु(जो) रामानु(वर)जगुरुवेङ्कटनिवासः ।
विवृणोति महदनुज्ञापरतन्त्रतया दयाशतकम् ॥

* * * *

इह खलु निखिलदिव्यास्थानातिलकायमानवेङ्कटाचलशृङ्गायमाणश्रीनिवासप्रसादप्रभावेन तदीयघण्टावतारतया प्रतीतः ग़बलपाषण्डशुण्डालकण्ठीरवः श्रीमान् वेदान्ताचार्यः स्वीयावतारनिदानभूतां श्रीनिवासदयां पद्यशतेन साधुजनमुदे यथावत् तुष्टूषन् सन् ।

* * * *

नमस्क्रियारूपं मङ्गलं निबध्नाति—

प्रपद्ये तं गिरं (रिं) प्रायः श्रीनिवासानुकम्पया ।
इक्षुसारस्रवन्त्येव यन्मूर्त्या शर्करायितम् ॥

श्रीनिवासानुकम्पया इक्षुसारस्रवन्त्येव इक्षुसारप्रवाहात्मकनद्येव यन्मूर्त्या यस्य गिरेः मूर्त्या आकारेण ।

End:

वृषगिरिपतेर्हृद्या विश्वावतारसहायिनी
क्षपि(त)निखिलावद्या देवी क्षमादिनिषेविता ।

भुवनजननी पुंसां भोगापवर्गविधायिनी
वितमसि पदे व्यक्तिं नित्यां बिभर्षि दये स्वयम् ॥

*　*　*　*

स्वयं नित्यां व्यक्तिं मूर्तिं बिभर्षि वहसि । यद्वा नित्यां व्यक्तिं परमपदनाथदिव्यविग्रहं बिभर्षि रक्षसीत्यर्थः ॥ ७२ ॥

R. No. 634.

Palm-leaf. 16 × 1⅝ inches. Foll. 159. Lines, 9 in a page. Grantha. Injured.

Purchased in 1912–13 through R. Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1*a* gives the name of the work as **पुरुषोत्तमभट्टीयम्, श्रौतविषयम्.** Foll. 1*b* and 2*a* are left blank. Fol. 2*b* contains some Vedic verses with **ऋषिच्छन्दोदेवता.**

(*a*) **प्रयोगपारिजातः.**

PRAYŌGAPĀRIJĀTAḤ.

Foll. 3*a*—68*a*.

Similar to the work described under Nos. 1127 and 1134 of the D.C.S. MSS., Vol. II. A manual of procedure relating to certain sacrificial rituals : by Puruṣōttamabhaṭṭa, son of Dēvarāja.

Contains **चयनोपस्थान, अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, षोडशी, वाजपेय, बृहस्पतिसवन, अतिरात्र, अप्तोर्याम, सर्वपृष्ठ.**

Beginning :

साग्निचित्यस्य भेदः प्रथमोपसदानन्तरं सुब्रह्मण्यानुष्ठानान्ते

*　*　*　*

दक्षिणस्य पक्षस्य पश्चात् प्राङ्मुखस्तिष्ठेत् । यत्रोपधानं कुर्वन्ति

ततः पश्चात् तिष्ठन् पुष्करपलाश उपधीयमाने अध्वर्युप्रेषितः यजमानं सत्यमिति व्याहृतिसाम त्रिर्गापयेत् ।

End:

ऋतस्य त्वेति सोमविमोचनम् । अथ तन्तवे मेत्यादि उदवसानीयान्तं यज्ञपुच्छं भवति । हार्योजने शरतोक्थस्य तिरोऽह्नस्त्येति भवति ।

Colophon:

इति—

पुरुषोत्तमभट्टेन देवराजस्य सूनुना ।
प्रयोगपारिजातोऽयं सर्वपृष्ठक्रतोः कृतः ॥

Foll. 68*a*—69*a* contain रथन्तरशाक्करमहानाम्नीलक्षणानि.

(*b*) वाजपेयकारिका.

VĀJAPĒYAKĀRIKĀ.

Foll. 69*a*—70*b*.

A metrical treatise on the procedure relating to the sacrificial rite called Vājapēya: by Śrīnivāsa of Bhāradvājagōtra.

Complete.

Beginning:

अथ(थाद्य)वाजपेयस्य प्रयोगक्रम उच्यते ।
वरणाद्यज्ञपुच्छान्तमग्निष्टोमसमं भवेत् ॥
तृतीयसवनादूर्ध्वं क्रमादुक्थ्यं च षोडशी ।
वाजपेयस्य सामाथ कार्याः सप्तदशर्त्विजः ॥

End:

एवं स्तुत्वा त्रिष्टुभा तु छन्दसा सोमभक्षणम् ।
कृत्वोद्वंशीयगानान्तं सर्वं प्रकृतिवद्भवेत् ॥

Colophon:

भारद्वाजकुलोद्भूतश्रीनिवासकवीन्दुना ।
वाजपेयप्रयोगस्य कारिका ललिता कृता ॥

(*c*) अग्निष्टोमकारिका.

AGNIṢṬŌMAKĀRIKĀ.

Foll. 70*b*—74*b*.

Similar to the last, but relates to the Agniṣṭōma sacrifice. By the same author as of the last.

Complete.

Beginning:

श्रीरामचरणाम्भोजं निधाय हृदि सादरम् ।
अग्निष्टोमप्रयोगस्य कारिका वक्ष्यते मया ॥
अग्निर्देवेति चोद्गातुमर्हे म इति ऋग्जपः ।
मधुपर्कश्च सर्वेषां वरणं चाग्निमन्त्रतः ॥

End:

इष्टावुदवसानीयायामुद्वंशीयमादरात् ।
एवं क्रतूनां सर्वेषां यज्ञपुच्छं समापयेत् ॥

Colophon:

भारद्वाजकुलोद्भूतश्रीनिवासकवीन्दुना ।
अग्निष्टोमप्रयोगस्य संक्षेपात् कारिका कृता ॥

(*d*) छन्दोगश्रौतप्रयोगप्रदीपिका.

CHANDŌGAŚRAUTAPRAYŌGAPRADĪPIKĀ.

Foll. 74*b*—111*b*.

Similar to the work described under No. 1033 of the D.C.S. MSS., Vol. II.

Contains Dvādaśāha only.

(e) अहीनकल्पः.

AHĪNAKALPAḤ.

Foll. 112a—118b.

A manual of procedure connected with the Ahīna rite of the Sāmavēda : by Varadarāja, son of Vāmana.

Complete.

Beginning :

. . . . नयनमत्पौण्डरीकस्य क्लृप्तिः ।

व्यूढो नवरात्रः । महाव्रतं वैश्वानरोऽतिरात्र इति । तस्य प्रथमस्याह्नो बहिष्पवमानम् ।

End :

वैश्वानरशब्देन ज्योतिष्टोमोऽतिरात्र उच्यते । तस्याहीनकी रात्रिः ॥

Colophon :

इत्थं वरदराजेन वामनाचार्यसूनुना ।

अहीनकल्पो व्याख्यातो गोविन्दः प्रीयतामिति ॥

(f) द्राह्यायणश्रौतसूत्रभाष्यम्.

DRĀHYĀYAṆAŚRAUTASŪTRABHĀṢYAM.

Foll. 118b—142b.

Same work as the one described under No. 1038 of the D.C.S. MSS., Vol. II.

Contains the fourth Paṭala of the third Daśaka.

(g) क्रतुवैगुण्यप्रायश्चित्तम.

KRATUVAIGUṆYAPRĀYAŚCITTAM.

Foll. 143a—146b.

Similar to the work described under No. 1159 of the D.C.S. MSS., Vol. II.

This is intended to supplement the Audgātratantra composed in relation to the Jyōtiṣṭōma sacrifice by Varadarāja, son of Vāmanācārya. The author of the work is Raṅganāthādhvarin of the village of Kaṇḍaramāṇikka and states that he has also composed Makaranda, a commentary on Padamañjarī, and Pūrṇimā, a commentary on Kaumudī (probably the Siddhānta-kaumudī of Bhaṭṭōjidīkṣita).

Incomplete.

Beginning:

श्रीमूलस्थानसर्वेशमाखिलाण्डेश्वरीप्रियम् ।
सनातनमहं वन्दे सीतारामौ च सर्वदा ॥

प्रधानसूत्रकारादीन् मुनीन् द्राह्यायणादिकान् ।
राणायन्यादिकान् सामगाचार्यान् प्रणमाम्यहम् ॥

येन कण्डरमाणिक्यग्रामरत्ननिवासिना ।
रङ्गनाथाध्वरीन्द्रेण मकरन्दाभिधा कृता ॥

व्याख्या हि पदमञ्जर्याः कौमुद्याः पूर्णिमा तथा ।
इत्थं वरदराजेन वामनाचार्यसूनुना ॥

ज्योतिष्टोमस्य यत्तन्त्रमौद्गात्रं तत्प्रदर्शितम् ।
गणेशं शारदां नत्वा कल्पकारमतः परम् ॥

प्रायश्चित्तानि वक्ष्येऽहं क्रतुवैगुण्यशान्तये ।
शार्ङ्गादिपरिसाम्नांश्चेत्प्रस्तोता स्खलिते यदि ॥

पुनश्चित्वा तदा ज्ञेयं महाव्याहृतिभिर्हुनेत् ॥

End:

च(।)त्वाले चमसादीनां समस्तान्ताहुतिस्तथा ।
उद्गातुर्भक्षणात् पूर्वं प्रस्तोतुश्चमसे यदि ॥

(*h*) वाजपेयकल्पभाष्यम्.

VĀJAPĒYAKALPABHĀṢYAM.

Foll. 147*a*—156*b*.

This is a commentary on the Vājapēya-kalpa-sūtras described in the next sub-division. The name of the commentator is not known.

Complete.

Beginning:

सप्तदश उक्थ्यः षोडशिमानित्यनुवाकद्वयेनोक्तः । तस्य सूत्रम्—यं ब्राह्मणा राजानश्च पुरस्कुर्वीरन् स वाजपेयेन यजेतेत्यादिखण्डद्वयम् । सुब्रह्मण्यायां शुक्रागच्छ विश्वे ब्रह्मणा इति विशेषः । अनिरुक्तप्रातःस्सवनत्वात् स्तोत्रक्लृप्तिमाह—पूर्वस्य बहिष्पवमानावृत्यानि त्रीण्याज्यानि वैश्वजितमुत्तमम् ।

End:

इन्द्र(न्द)विन्द्रवी(पी)तस्येन्द्रियावतस्त्रिष्टुप्छन्दसः सर्वगणस्य सर्वगण इति भक्षः, त्रिष्टुप्छन्दसा वाजपेयसाम्नि भक्षयेदिति वचनात् । अथ स्तोमविमोचनाद्युदवसानीयान्तं पूर्ववत् ॥

Colophon:

इति वाजपेयः ॥

(*i*) वाजपेयकल्पसूत्रम्.

VĀJAPĒYAKALPASŪTRAM.

Foll. 157*a*—158*b*.

Gives the Kalpasūtras relating to the performance of the sacrificial rite called Vājapēya. This is not found in any of the printed Kalpasūtras.

Complete.

Beginning :

यं ब्राह्मणा राजानश्च पुरस्कुर्वीरन् स वाजपेयेन यजेत, तस्य पौर्णमास्यां दीक्षित्वा त्रयोदश दीक्षाः कुर्वीरन् ।

End :

प्रथमेऽहनि यन्मध्यंदिन आनयेयुः प्रातस्सवन उत्तरयोः स्तोत्रवेलायामेनं प्रज्वलयेयुः ॥

Fol. 159*a* contains a stanza of invocation addressed to one Ayyaṇṇācārya. Fol. 159*b* is left blank.

R. No. **635.**

Palm-leaf. 16 × 1½ inches. Foll. 190. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

सामवेदब्राह्मणम्.

SĀMAVĒDABRĀHMAṆAM.

Same work as the one described under No. 58 of the D.C.S. MSS., Vol. I, Part II.

Contains Brāhmaṇas 1 to 7 complete.

R. No. **636.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 13. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottiyur, near Kumbakonam.

(*a*) **सुभाषितमञ्जरी.**

SUBHĀṢITAMAÑJARĪ.

Foll. 1*a*—12*b*.

Same work as the one described under R. No. 582 *ante* : this MS. contains also the last two Paddhatis. The names of the

Paddhatis are given under the number noted above. The following are the names of those that are not found therein :—
३९. संकीर्णपद्धति, ४०. संकीर्णपद्धति.

Complete in 40 Paddhatis.

Colophon :

इति चक्रवर्तिवेङ्कटाचार्यकृतिषु सुभाषितमञ्जरी समाप्ता ॥

(*b*) वृश्चिकपञ्चकम्.

VṚŚCIKAPAÑCAKAM.

Fol. 13*a*.

Five stanzas on the characteristics of scorpions : by Cakravarti Vēṅkaṭācārya

Complete.

Beginning :

निजोत्पत्तिस्थानं सुचिरवसतिप्रेमविषयं
स्वयं भित्वा मातुर्जठरमपि निर्गत्य जगताम् ।
व्यथां कृत्वाऽव्याजं परुषविष . . हतिभि-
र्भजत्युत्कृष्टत्वं परमुपकृतं वृश्चिकपते ॥ १ ॥

End :

नाम्ना द्रोणो यदसि तदिहायोनिजस्त्वं तदास्तां
कस्मादेवं न सहजकृपयालिङ्गितात्माभवस्त्वम् ।
युक्तं क्वापि द्रुपदभुवि ते वृत्तिरत्यन्तमुग्रा
नेदं युक्तं व्यथयसि जनान् वृश्चिकेन्द्राङ्गदेशे ॥ ५ ॥

Colophon :

श्रीचक्रवर्तिवेङ्कटसूरिकवीन्द्रेण निर्मितं ललितम् ।
वृश्चिकपञ्चकमेतत्पठतां नास्त्येव वृश्चिकाद्भीतिः ॥

(*c*) मूषिकपञ्चकम्.

MŪṢIKAPAÑCAKAM.

Fol. 13*b*.

Five stanzas on rats: by the same author as of the last. Complete.

Beginning:

कृत्वा भोगिमुखोपमैर्नखमुखैर्भित्तौ सुरङ्गावलीं
धावंधावमुपेत्य वस्त्रपिटकं दृष्ट्वा तदन्तर्गतः ।
दन्तच्छिन्नपिधानदारुघुटिकारन्ध्रच्युतं भक्षयन्
नैवापं तिलमाखुपाश सफलीभूतश्रमोऽस्यन्वहम् ॥ १ ॥

End:

ध्वान्तैस्तुल्यतया निशास्वविदितो धान्यानि चौर्याहृता
न्याखो स्वोदरमात्रपूरणपरस्त्वं प्रापय स्वं बिलम् ।
कामं भुङ्क्ष्व न ते विलम्बसमयो भोगी बिडालोऽथवा
प्राप्तश्चेत्क भवान् क धान्यकमिदं कैषा सुरङ्गावली ॥

Colophon:

इति वेङ्काचटार्यकृतौ मूषिकपञ्चकं समाप्तम् ॥

R. No. 637.

Palm-leaf. 16 × 1⅝ inches. Foll. 66. Lines, 8 in a page. Grantha. Injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1*a* gives the name of the work as अपरभाष्यम्. Foll. 1*b* and 2 are left blank.

द्राह्यायणापरसूत्रभाष्यम्.

DRĀHYĀYAṆĀPARASŪTRABHĀṢYAM.

Foll. 3*a*—64*b*.

A commentary on the Drāhyāyaṇāparasūtra, described under No. 3637 of the D.C.S. MSS., Vol. VII.

Wants beginning; incomplete.

As the first two lines are lost, the beginning given here forms the third line.

Beginning:

तच्छन्देन पित्रादयः परामृश्यन्ते । स्वर्गनिमित्तेन श्रावणम् । इमानि छन्दांसि संस्कर्ता श्रावयेत् ।

End:

पञ्चरात्रं वा स्नात्वोदकं दत्वा शरावमश्मानं च स्थानादुद्धृत्यावटं पूरयित्वा यत्रकुत्रचित् शरावमश्मानं च ।

Foll. 65 and 66 are left blank.

R. No. **638**.

Palm-leaf. 16½ × 1⅜ inches. Foll. 62. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

(*a*) आपस्तम्बस्मृतिः.

ĀPASTAMBASMṚTIḤ.

Foll. 1*a*—39*b*.

Same work as the one described under No. 26:0 of the D.C.S. MSS., Vol. V.

Complete in six Paṭalas.

The transcription of this MS. is said to have been completed in the month of Paṅguni in the year Dhātu.

(*b*) संवर्तस्मृतिः.

SAMVARTASMṚTIḤ.

Foll. 40*a*—62*b*.

Same work as the one described under No. 2781 of the D.C.S MSS., Vol. V.

Breaks off in the tenth Adhyāya.

R. No. 639.

Palm-leaf. 15⅜ × 1 inches. Foll. 57. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Foll. 1—21 are blank.

(*a*) द्राह्यायणगृह्यप्रयोगकारिका—परिशिष्टसहिता.

DRĀHYĀYAṆAGṚHYAPRAYŌGAKĀRIKĀ WITH PARIŚIṢṬA.

Foll. 22*a*—49*a*. Foll. 28*b* and 49*b*—51*b* are left blank.

Similar to the work described under No. 3635 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*b*) अघमर्षणसूक्तविधिः.

AGHAMARṢAṆASŪKTAVIDHIḤ.

Foll. 52*a*—54*b*.

This describes the manner of religiously repeating the Vedic Sūkta called Aghamarṣaṇa, for effecting the removal of one's sins.

Complete

Beginning :

अथातोऽघमर्षणविधिं व्याख्यास्यामः—आचान्तः सोत्तरीयः प्राङ्मुख उदङ्मुखो वा नद्यां प्रवाहाभिमुखमापो हि ष्ठेत्यादिभिः प्रोक्षणम् ।

End :

सहस्रशीर्षेति पञ्चर्चेनाघमर्षणम् । शं नो देव्याहुति(भि)मार्जनं चेति सर्वेभ्यः पापेभ्यः शुद्धः पूतः पुण्यलोके भवतीत्याह भगवान् गुरुः ॥

Foll 54*b* and 55*a* contain some passages relating to the Hindu law of adoption. Foll. 55*b*—57*b* are left blank.

R. No. 640.

Palm-leaf. 16¼ × 1¼ inches. Foll. 126. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1*a* gives the name of the work incompletely as पूर्वप्रयोग: Foll. 1*b*—3*b* are left blank. Foll. 4 and 5*a* contain नारायणबलिप्रयोगः. Fol. 5*b* is left blank

द्राह्यायणपूर्वापरप्रयोगः.

DRĀHYĀYAṆAPŪRVĀPARAPRAYŌGAḤ.

Foll. 6*a*—125*b*. Foll. 119*b* and 126 are left blank.

Similar to the work described under No. 3636 of the D.C.S. MSS., Vol. VII. By Puruṣōttamabhaṭṭa, son of Dēvarāja.

Incomplete.

Beginning:

यज्ञेश्वरं विभुं देवं यज्ञानां फलदायिनम् ।
श्रीभूमिनीलासहितं नौमि सर्वार्थसिद्धये ॥
पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
गृह्योक्तकर्मणां क्लृप्तिः सुस्पष्टं क्रियतेऽधुना ॥

अथ परिभाषा—

गृह्योक्तानां कर्मणामुदगयनपूर्वपक्षपुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेशे आदिष्टकालविशेषाणां सोष्यन्तिहोमजातकर्मादीनामाश्वयुग्यादीनां चादिष्ट एव कालो विज्ञेयः ।

End:

इमं कुमारं तुषाग्निना एकर्चाविधिना संस्करिष्ये इति पलाशशाखया अपसर्पत प्रेता इति संमृज्यात् । गच्छमेव तिस्रः कर्षुः ।

R. No. 641.

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 110. Lines, 6 in a page. Injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1 is left blank.

(*a*) द्राह्यायणश्रौतसूत्रम्.

DRĀHYĀYAṆAŚRAUTASŪTRAM.

Foll. 2*a*—68*b*.

Same work as the one described under No. 1037 of the D.C.S. MSS., Vol. II.

Breaks off in the 19th Paṭala.

Foll. 69—87 are left blank.

(*b*) छन्दोविचितिसूत्रम्.

CHANDŌVICITISŪTRAM

Foll. 88*a*—97*b*.

Same work as the one described under No. 904 of the D.C.S. MSS., Vol. II.

Complete.

(*c*) प्रतिहारसूत्रम्.

PRATIHĀRASŪTRAM.

Foll. 98*a*—106*b*.

Same work as the one described under No. 1040 of the D.C.S. MSS., Vol. II.

Incomplete.

(*d*) प्रस्तावसूत्रम्.

PRASTĀVASŪTRAM.

Foll. 107*a*—109*a*.

These Sūtras relate to the Prastāva-sāman.

Complete.

Beginning:

अथोहगीतायां प्रस्तावोद्देशः—स्तोभं पुरस्तादन्तर्वा प्रस्तोतुरन्ते चाविधायरुद्गातुस्तु काण्वऋषभः पवमानजानित्राणां हुवादिर्वासिष्ठे पद्योऽनादेशे ।

End :

प्रस्ताव्ये वासन्तनिनः प्रस्ताव्ये वासन्तनिनः । अनवर्णास्तु चो।नि। मिनस्त्र्यक्षरपदद्वयः ॥

Colophon :

प्रस्तावसूत्रम् ॥

(e) उद्गीथसूत्रम्.

UDGĪTHASŪTRAM.

Fol. 109.

Similar to the last. This relates to Udgītha.

Complete.

Beginning :

अथ साम्नां पञ्चधाकारः प्रस्तावात् पूर्वं उद्गीथादोंकारश्चतुष्टयानि सामानि ।

End :

सर्वेषामोंकारेणोद्गीथदानम् ; प्रथमाक्षरलोपं तु धानञ्जय्यः । लोपं तु शाण्डिल्यः ॥

Colophon :

इत्युद्गीथसूत्रं समाप्तम् ॥

Fol. 110 is left blank.

R. No. **642**.

Palm-leaf. 15 × $1\frac{1}{4}$ inches. Foll. 86. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgar of Kottaiyur, near Kumbakonam.

Fol 1*a* gives the name of the work as Mantrabhāṣyam. Fol. 1*b* contains Āgrahāyaṇakālanirṇaya.

सामवेदमन्त्रभाष्यम्.

SĀMAVĒDAMANTRABHĀṢYAM.

Foll. 2*a*—85*b*. Fol. 86 is left blank.

Same work as the one described under No. 70 of the D.C.S. MSS., Vol. I, Part II. By Sāyaṇācārya

Contains the first Adhyāya complete and the second Adhyāya incomplete.

Colophon :

श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे सामब्राह्मणे मन्त्रपर्वणि प्रथमोऽध्यायः ॥

R. No. **643.**

Palm-leaf. $17\frac{1}{2} \times 1\frac{3}{4}$ inches. Foll. 32. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

सर्वपृष्ठाप्तोर्यामम्.

SARVAPṚṢṬHĀPTŌRYĀMAM.

Similar to the work described under No. 1041 of the D.C.S. MSS., Vol. II.

Complete.

R. No. **644.**

Palm-leaf. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 201. Lines, 7 in a page. Grantha. Good.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1*a* gives the name of the work as **धन्वी उत्तरपश्चदशी श्रौतविषयम्.** Fol. 1*b* is left blank. Fol. 2*a* gives the errata in the MS. Foll. 2*b*—7*b* are left blank.

(*a*) **फुल्लसूत्रम्—सभाष्यम्.**

PHULLASŪTRAM WITH BHĀṢYA.

Foll. 8*a*—10*b*.

Same work as the one described under No. 937 of the D.C.S. MSS., Vol. II.

Contains the first Khaṇḍa complete.

(b) द्राह्यायणश्रौतसूत्रभाष्यम्.

DRĀHYĀYAṆAŚRAUTASŪTRABHĀṢYAM.

Foll. 11a—195b. Foll. 89b, 114b, 134b, 163b and 196—20 are left blank.

Similar to the work described under No. 1038 of the D.C.S. MSS., Vol. II.

Contains from the seventh Paṭala of the first Daśaka to the end of the second Paṭala of the third Daśaka.

Fol. 201 contains a few lines regarding अप्तोर्याम.

R. No 645.

Palm-leaf. 16¼ × 1⅛ inches. Foll. 176. Lines, 8 in a page. Grantha. Good.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

महावीरचरितव्याख्या—भावप्रद्योतिनी.

MAHĀVĪRACARITAVYĀKHYĀ: BHĀVAPRADYŌTINĪ.

A commentary on the Mahāvīracarita of Bhavabhūti: by Vādhūla Vīrarāghava.

Complete.

R. No. 646.

Palm-leaf. 16¼ × 1½ inches. Foll. 72. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1a gives the name of the work contained herein as धन्वि-श्रौतविषय. Foll. 1b—2b are left blank.

द्राह्यायणश्रौतसूत्रभाष्यम्.

DRĀHYĀYAṆAŚRAUTASŪTRABHĀṢYAM.

Foll. 3a—70b.

Same work as the one described under No. 1038 of the D.C.S. MSS., Vol. II.

Breaks off in the seventh Paṭala of the first Daśaka.

Foll. 71 and 72 are left blank

R. No. **647**.

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 50. Lines, 12 in a page. Grantha. Slightly injured.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakonam.

Fol. 1*a* gives the name of the work contained herein as **मैरावणचरितम्.** Fol. 1*b* is left blank.

(*a*) मैरावणचरितम्.

MAIRĀVAṆACARITAM.

Foll. 2*a*—30*b*.

Same work as the one described under No. 2083 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

Copying completed by Kōdaṇḍarāman, son of Ādikēśava Ayyar, on Thursday, the 2nd of the month of Dhanus, which was also the 6th day of the bright fortnight, when the moon was in the asterism Jyēṣṭhā, in the year Kālayukti.

(*b*) शतमुखरावणचरितम्.

ŚATAMUKHARĀVAṆACARITAM.

Foll. 31*a*—36*b*.

This gives a legendary account of the wonderful vanquishment of the hundred-headed Rāvaṇa by Sītā.

Complete.

Beginning :

शतानन्दः—

शतानन्दो महायोगी वसिष्ठं सत्यवादिनम् ।
अपृच्छद्रामचरितं सीताविजयसंस्थितम् ॥

वसिष्ठः—

शतास्यो नाम दनुजः सीतया निहतः पुरा ।
वक्ष्यामि शृणु भद्रं ते तदाख्यानं महामुने ॥

* * * *

Colophon :

इति श्रीमद्वासिष्ठोत्तररामायणे एकादशोऽध्यायः ॥

End :

वसिष्ठोक्तं तु यत्पुण्यं रामस्य चरितं महत् ॥
तच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।
पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ॥
कन्यार्थी लभते कन्यां राज्यार्थी राज्यमाप्नुयात् ।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥

Colophon :

इति श्रीमद्वासिष्ठोत्तररामायणे शतास्यविजयो नाम द्वादशोऽध्यायः ॥

Fol. 37 is left blank.

(*c*) सीताविजयः.

SĪTĀVIJAYAḤ.

Foll. 38*a*—49*b*.

Same work as the one described under R. No. 148 *ante*.

Complete.

Fol. 50 contains a few stanzas giving a description of the town of Ayōdhyā.

R. No. **648.**

Palm-leaf. 13×1¼ inches. Foll. 102 Lines, 5 in page. Grantha. Good.

Purchased in 1912–13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur, near Kumbakoṇam.

Foll. 1 and 2*b* are left blank. Fol. 2*a* contains a stanza regarding पञ्चगव्यविधि.

(*a*) गद्यत्रयम्.

GADYATRAYAM.

Foll. 3*a*—7*a*.

Same work as the one described under R. No 174(*n*) *ante*.

Contains Śrīraṅgagadya complete, and Śaraṇāgatigadya incomplete.

Foll. 7*b* to 8*b* are left blank.

(*b*) सामवेदब्राह्मणम्.

SĀMAVEDABRĀHMAṆAM.

Foll. 9*a*—31*a*. Fol. 31*b* is left blank.

Same work as the one described under No. 62 of the D.C.S. MSS., Vol. I, Part II.

Contains Mantrakhaṇḍa complete.

(*c*) शाट्यायनगृह्यकारिका.

ŚĀṬYĀYANAGṚHYAKĀRIKĀ.

Foll. 32*a*—38*b*.

On details connected with the performance of the daily religious domestic rites and ceremonies as observed by the followers of the Śaṭyāyanasūtra.

Incomplete.

Beginning:

अर्पनान्दी च रक्षा च संकल्पवरणाप्लवम् ।
पुण्याहोदकसेकाग्निब्रह्मकुम्भनिवेशनम् ॥
वस्त्रोत्तरीयमङ्गल्यधारणं सोमवाचक(न)म् ।
प्रमेवास्येति जपतो भर्तुर्दीक्षानिवेशनम् ॥
समस्तान्तचतुर्होमस्त्वग्निरेत्विति षट् पुनः ।
व्यास्थाहुतित्रयोत्थानमश्मारोहमतः परम् ॥

End:

पूर्वं दिग्वपनं कृत्वा पश्चात्क्षौरं विधीयते ।
* * * *
उपानयस्य विध्युक्तं गतस्यैव तु मन्त्रवत् ॥

Colophon:

इति शाट्यायनकारिका ॥

Fol 39*a* contains a stanza regarding भोजन. Fol 39*b* is left blank.

(*d*) **वरुणजपविधिः.**

VARUṆAJAPAVIDHIḤ.

Foll. 40*a*—41*a*. Fol. 41*b* is left blank.

This prescribes the manner of religiously repeating the Mantras addressed to Varuṇa with the object of invoking that god to send down rain in times of drought.

Complete.

Beginning:

अनुज्ञां कृत्वा अस्मि(न्) चोलमण्डले क्षामक्षोभनिवृत्यर्थं वृष्टिप्रतिबन्धकं वा ग्रहनिवृत्तिद्वारा सद्यो महावृष्टिसिद्ध्यर्थं पर्जन्यसूक्तजपं करिष्ये इति संकल्प्य जपेयुः ।

अथापरं प्रवक्ष्यामि कर्म वृष्टिप्रदायकम् ।
पवस्व वाचो अग्रिय इत्यादिदशकमृच(ा)म् ॥

End:

एहि ऋश्यशृङ्गमुने सद्यः सुवृष्टिं देहि देहि पर्जन्योम् । एवं त्रिः प्रत्याह्वानम् । कुम्भजलं जले प्रक्षिपेत् ॥ इत्याह्वानप्रकारः ।

(*e*) **स्थालीपाकः.**

STHĀLĪPĀKAḤ.

